# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल-२०१९

| | | |
|---|---|---|
| **कक्षा**-शास्त्री-3(SEM-6) | **प्रश्नपत्रम्** - ४ | **गुणाः** - ७० |
| **विषयः** - संस्कृतसम्भाषणम् | **कोड- OE- 366** | **समयः** - ११ तः २ |
| **दिनाङ्कः** -०२/०४/२०१९ | **सन्दर्भग्रन्थः**-सङ्क्षेपरामायणम् | |

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ निम्नेषु यथेच्छं द्वयोः पद्ययोर्व्याख्यां करोतु ।** १०

१ तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् । नारदं परिपप्रच्छ वाल्मीकिपरिपुङ्गवम् ॥

२ यौवराज्ये संयोक्तुमैच्छत्प्रीत्या महीपतिः । तस्याभिषेधसम्भारान् दृष्ट्वा भार्याऽथ कैकयी ॥

३ स जगाम वनं वीरः प्रतिज्ञामनुपालयन् । पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात् ॥

**प्रश्नः २ निम्नयोरेकस्य विषये लिखतु ।** १०

१ कैकेय्या वरद्वयस्य याचनम् ।

२ चित्रकूटप्राप्तिः ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ निम्नेषु यथेच्छं द्वयोरुत्तरं लिखतु ।** १०

१ भरतो रामस्य पादुके नीत्वा केन प्रकारेण राज्यमकरोत्?

२ केषां पुरस्ताद् रामः रक्षोवधप्रतिज्ञां विधाय राक्षसवधमकरोत्?

३ सीताया अन्वेषणं केन केन प्रकारेण रामेण कृतम्?

**प्रश्नः ४ निम्नयोर्यथेच्छमेकं यथाग्रन्थं समादधातु ।** १०

१ रावणेन केन प्रकारेण सीतायाः हरणं कृतम्?

२ महुमतः समुद्रलङ्घनम् ।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ निम्नेषु यथेच्छं द्वयोः पद्ययोर्व्याख्यां करोतु ।** १०

१ तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् । ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥

२ तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे । रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥

३ पठन् द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात् ।

वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥

**प्रश्नः ६ निम्नेषु यथेच्छं द्वौ समादधातु । १०**

१ हनुमता कृतम् सीतावृत्तनिवेदनम् ?

२ रामराज्यं वर्णयतु ।

३ ''पर्यावरणेनैव जीवानां जीवनम्'' इति विषये लिखतु ।

**प्रश्नः ७ निम्नेषु यथेच्छ दशानामेकवाक्येन उत्तरं लिखत । १०**

१ तृतीयदीक्षान्तर्गतसंक्षेपरामायणस्य सम्पादकः कोऽस्ति?

२ कैकेय्या याचितं वरद्वयं किम्?

३ रोहिणीव सीता कमनुगता?

४ धनदेन समं त्यागशीलः कोऽस्ति?

५ दशरथः कं विलपन् स्वर्गं जगाम?

६ कस्यादेशाद् रामो राज्यं नैच्छत्?

७ कस्मिन् ग्रामे भरतेन राज्यस्य संचालनं कृतम्?

८ 'महातेजाः' इति पदस्य समासविग्रहं लिखतु ।

९ हनुमान् कीदृशं लवणार्णवं पुप्लुवे?

१० रामो लङ्कायां कं राक्षसेन्द्रमभिषिषेच?

११ रामः किमुपास्य ब्रह्मलोकं प्रयास्यति?

१२ इदं रामचरितं कैः सम्मतमस्ति?

०००